॥भवानीसहस्रनाम॥
॥स्तोत्र॥

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीभवान्यै नमः ॥ कैला
सशिखरे रम्ये देवदेवं महेश्वरम् ॥ ध्यानोपरतमासीनं प्रसन्नमु
खपंकजम् ॥ १ ॥ सुरासुरशिरोरत्नरंजिताङ्घ्रियुगं प्रभुं ॥ प्रणम्य
शिरसा देवं बद्धांजलिरभाषत ॥ २ ॥ नंदिकेश्वर उवाच ॥ देवदेव ज
गन्नाथ संशयोस्ति महान्मम ॥ रहस्यं किंचिदिच्छामि प्रष्टुं त्वां भक्त
वत्सल ॥ ३ ॥ देवतायास्त्वया कस्याः स्तोत्रमेतद्दिवानिशं ॥ पठ्यते
रते नाथ त्वत्तः किमपरः परं ॥ ४ ॥ इति पृष्टस्तदा शंभुर्नंदिकेन
जगद्गुरुः ॥ प्रोवाच भगवानीशो विकसन्नेत्रपंकजः ॥ ५ ॥ ईश्वर
उवाच ॥ साधु साधु गणश्रेष्ठ पृष्टवानसि मां च यत् ॥ स्कंदस्यापि
हि यद्गोप्यं रहस्यं कथयामि ते ॥ ६ ॥ पुरा कल्पक्षये लोकान्सि स्र

जन्मदा चेतनां ॥ गुणत्रयमयी शक्तिर्मूलप्रकृतिसंज्ञिता ॥७॥ त-
स्यामहं समुत्पन्नास्तत्वैस्तैर्महदादिभिः ॥ चेतनेति ततः शक्तिर्मां
काप्यालिंग्य तस्थुषी ॥८॥ हेतुः संकल्पजालस्य मनोधिष्ठायि
नी शुभा ॥ इच्छेति परमा शक्तिरुन्मिमील ततः परं ॥९॥ ततो वागी
२ ति विख्याता शक्तिः शब्दमयी शुभा ॥ प्रादुरासीज्जगन्माता वेदमा
ता सरस्वती ॥१०॥ ब्राह्मी वैष्णवी रौद्री कौमारी पार्वती शिवा ॥ सि
द्धिदा बुद्धिदा शांता सर्वमंगलदायिनी ॥११॥ तयैतत्सृज्यते विश्व
मनाधारं च धार्यते ॥ तयैतत्पाल्यते सर्वं तस्यामेव प्रलीयते ॥१२॥
अर्चिता प्रणता ध्याता सर्वभावविनिश्चिता ॥ आराधिता स्तुता सै
व सर्वसिद्धिप्रदायिनी ॥१३॥ तस्याश्चानुग्रहादेव तामेव स्तुतवानहं

नो॥ सहस्रैर्नामभिर्दिव्यैस्त्रैलोक्यप्राणिपूजितैः॥१४॥ स्तवेनानेन
संतुष्टा मामेव प्रविवेश सा॥ तदारभ्य मया प्राप्तमैश्वर्यं पदमुत्तमं॥१५
॥ तत्प्रभावान्मया सृष्टं जगदेतच्चराचरं॥ ससुरासुरगंधर्वयक्षरा
क्षससमानवं॥१६॥ सपन्नगं ससमुद्रं सशैलवनकाननं॥ सग्रहरा
शिनक्षत्रं पंचभूतगुणान्वितं॥१७॥ नंदीनामसहस्रेण स्तवेनानेन स
र्वदा॥ स्तौम्यहं परमांशक्तिं ममानुग्रहकारिणीं॥१८॥ इत्युक्तोपर
मं देवं चराचरगुरुं विभुं॥ प्रणम्य शिरसा नंदी प्रोवाच परमेश्वरं
॥१९॥ नंदिकेश्वर उवाच॥ भगवन्देवदेवेश लोकनाथ जगत्प्रभो॥
भक्तोस्मि तव दासोस्मि प्रसादः क्रियतां मयि॥२०॥ देव्याः स्तवमिदं
पुण्यं दुर्लभं यत्सुरैरपि॥ स्तोतुमिच्छाम्यहं देवप्रभावमपि चास्य च

॥४१॥ ईश्वर उवाच॥ श्रृणु नंदिन्महाभाग स्तवराजमिदं शुभं॥ सहस्रै
र्नामभिर्दिव्यैः सिद्धिदं सुखमोक्षदं॥४२॥ शुचिभिः प्रातरुत्थाय पठित
व्यं समाहितैः॥ त्रिकालं श्रद्धया युक्तैर्नातः परतरं स्तवं॥४३॥ अ
थ न्यासः॥ एकवीरायै नमः। अंगुष्ठाभ्यां नमः। ॐ महामायायै नमः।
तर्जनीभ्यां नमः। ॐ पार्वत्यै नमः। मध्यमाभ्यां नमः। ॐ गिरीशप्रि
यायै नमः। अनामिकाभ्यां नमः। ॐ गौर्यै नमः॥ कनिष्ठिकाभ्यां न
मः। ॐ करालिन्यै नमः। करतलकरपृष्ठाभ्यां नमः। ॐ एकवीरायै
नमः। हृदयाय नमः। ॐ महामायायै नमः। शिरसे स्वाहा। ॐ पार्व
त्यै नमः। शिखायै वषट्। ॐ गिरिशप्रियायै नमः। कवचाय हुं। ॐ
गौर्यै नमः। नेत्रत्रयाय वौषट्। ॐ करालिन्यै नमः। अस्त्राय फट्॥

ॐ अस्य श्री भवानी सहस्र नाम स्तोत्रँस्य श्री भगवान्महादेव ऋषि
रानुष्टुप्छंदः शक्ति भगवती देवता अनुष्टुप्छंदः ॥ ॐ ह्रीं बीजं क्लीं कीलकं।
श्री भवानी प्रीत्यर्थे धर्मार्थ काम मोक्षार्थे जपे विनियोगः ॥ बीजत्रयाय
विग्रहे तत्सधानाय धीमहि तन्नो शक्तिः प्रचोदयात् ॥ अथ ध्यानं ॥ अर्द्ध
इन्दु मौलि ममलाममराभिवंद्या अंभोजपाश सृकांकुशकपालहस्तां
॥ रक्तांगरागर सनाभरणां त्रिनेत्रां ध्याये शिवस्य वनितां मदविह्वलां
गी ॥ २४ ॥ २५ ॥ ॐ महाविद्या जगन्माता महालक्ष्मी शिवप्रिया ॥ विष्णुमा
या शुभा शांता सिद्धा सिद्धिः सरस्वती ॥ २६ ॥ क्षमा कीर्तिः प्रभा ज्योत्स्ना
पार्वती विश्व मंगला ॥ हिंगुला चंडिका दांता पद्मा लक्ष्मी हरिप्रिया ॥ २७
॥ त्रिपुरा नंदिनी नंदा सुनंदा सुरवंदिता ॥ यज्ञविद्या महामाया वेद

माता स्वधा धृतिः ॥२८॥ प्रीतिः प्रिया प्रसिद्धा च मृडानी विंध्यवासिनी
॥ सिद्धविद्या महाशक्तिः पृथ्वी नारदसेविता ॥२९॥ पुरुहूतप्रिया का
ति कामिनी पद्मलोचना ॥ प्रह्लादिनी महामाया दुर्गा दुर्गार्तिनाशि
नी ॥३०॥ ज्वालामुखी सुगोत्रा च ज्योतिः कुमुदहासिनी ॥ दुर्गमा दुर्ल
भा विद्या स्वर्गतिः पुरवासिनी ॥३१॥ अपर्णा शांबरी माया मदिरा मृ
डुहासिनी ॥ नारायणी महानिद्रा योगनिद्रा प्रभाविनी ॥३२॥ प्रज्ञा
पारमिता प्रज्ञा तारा मधुमती मधुः ॥ क्षीरार्णवसुताकारा कालिका
सिंहगामिनी ॥३३॥ ॐकारा च सुधाकारा चेतना कोपनाकृतिः ॥ अ
र्द्धबिंदुधराधारा विश्वमाता कलावती ॥३४॥ पद्मावती सुवस्त्रा च
प्रबुद्धा च सरस्वती ॥ कुंडासनी जगद्धात्री बुद्धमाता जिनेश्वरी ॥३५॥

जिनमाता जिनेंद्रा च शारदा हंसवाहिनी ॥ राज्यलक्ष्मीर्वषट्कारा सुधा
कारा सुधात्मिका ॥ ३६ ॥ राजनीतिस्त्रयी वार्त्ता दंडनीतिः कृपावती ॥ स
द्भूतिस्तारिणी श्रद्धा सद्गतिः सत्परायणा ॥ ३७ ॥ सिंधुर्मंदाकिनी गंगा य
मुना च सरस्वती ॥ गोदावरी विपाशा च कावेरी च शतद्रुका ॥ ३८ ॥ सर
यूश्चंद्रभागा च कौशिकी गंडकी शिवा ॥ नर्मदा कर्मनाशा च चर्मण्वती
च वेदिका ॥ ३९ ॥ वेत्रवती वितस्ता च वरदा वरवाहना ॥ सती पतिव्रता
साध्वी सुचक्षुः कुंडवासिनी ॥ ४० ॥ एकचक्षुः सहस्राक्षी सुश्रोणिर्भ
गमालिनी ॥ सेनाश्रेणिः पताका च सव्यूहा युद्धकांक्षिणी ॥ ४१ ॥ सुपता
काद्यारंभा विपंची पंचमप्रिया ॥ परापरकला कांता त्रिशक्तिर्मोक्षदा
यिनी ॥ ४२ ॥ ऐंद्री माहेश्वरी ब्राह्मी कौमारी कमलासना ॥ इच्छा भगव

तीधेनुः कामधेनुः कृपावती॥४३॥वज्रायुधा वज्रहस्ता चंडी चंडप
राक्रमा॥गौरी सुवर्णवर्णा च स्थितिः संहारकारिणी॥४४॥एकानेका
महेज्या च शतबाहुर्महाभुजा॥भुजंगभूषणा भूषा षट्चक्रक्रमवा
सिनी॥४५॥षट्चक्रभेदिनी श्यामा कायस्था कायवर्जिता॥सुस्मि
ता सुमुखी क्षामा मूलप्रकृतिरीश्वरी॥४६॥अजा च बहुवर्णा च पु
रुषार्थप्रवर्त्तिनी॥रक्तनीला सिता श्यामा कृष्णा पीता च कर्बुरा॥४७
॥क्षुधा तृष्णा जरा वृद्धा तरुणी तरुणालया॥कला काष्ठा मुहूर्त्ता च नि
मेषा कालरूपिणी॥४८॥सुवर्णा रसना नासा चक्षुः स्पर्शवती रसा॥
गंधप्रिया सुगंधा च सुस्पर्शा च मनोगतिः॥४९॥मृगनाभिर्मृगाक्षी
च कर्पूरामोदधारिणी॥पद्मयोनिः सुकेशी च सुलिंगा भगरूपिणी॥५०॥

योनिस्तुद्रा महामुद्रा खेचरी खगगामिनी॥ मधुश्रीर्माधवीवल्ली मधु
मत्ता मदोद्धता॥५१॥ मातंगी शुकहस्ता च पुष्पबाणेक्षुचापिनी॥ रक्तां
बरधरा क्षीवा च महाश्वेता वसुप्रिया॥५२॥ मंत्रः॥ ॐ ह्रां ह्रीं ह्रूं ह्रः रक्तां
बरी स्वाहा॥ शुभ्रांबरधरा धीरा रक्तपुष्पावतंसिनी॥ सुवेणीपद्म
हस्ता च मुक्ताहारविभूषणा॥५३॥ कर्पूरामोदनिःश्वासा पद्मिनी प
द्ममंदिरा॥ खड्गिनी चक्रहस्ता च भुशुंडी परिघायुधा॥५४॥ चापि
नी पाशहस्ता च त्रिशूलवरधारिणी॥ सुबाणा शक्तिहस्ता च मयूरव
रवाहना॥५५॥ वरायुधधरा धीरा वीरपानमदोत्कटा॥ वसुधा व
सुधारा च जया शाकंबरी शिवा॥५६॥ विजया च जयंती च सुस्तनी
शत्रुनाशिनी॥ अंतर्वत्नी वेदशक्तिर्वरदा वरधारिणी॥५७॥ शीतला

चसुशीला च बाल ग्रहविनाशिनी ॥ कुमारी च सुपर्वी च कामाक्षा का
मवंदिता ॥ ५८ ॥ जालंधरधरानंता कामरूपनिवासिनी ॥ कामबीजव
तीसत्याय सत्यमार्गपरायणा ॥ ५९ ॥ स्थूलमार्गस्थिता सूक्ष्मा सूक्ष्म
बुद्धिप्रबोधिनी ॥ षट्कोणा च त्रिकोणा च त्रिनेत्रा वृषभध्वजा ॥ ६० ॥ वृ
षप्रिया वृषारूढा महिषासुरघातिनी ॥ शुंभदर्पहरा दृप्ता दीप्तपावक
सन्निभा ॥ ६१ ॥ कपालभूषणा काली कपाली वली धारिणी ॥ कपाल
6 कुंडला दीर्घा शिवदूती घनध्वनी ॥ ६२ ॥ सिद्धिदा बुद्धिदा नित्या सत्य
मार्गप्रबोधिनी ॥ कंबुग्रीवा वसुमती छत्रछायाकृतालया ॥ ६३ ॥ कुंड
लिनी जगद्गर्भा भुजगाकारशायिनी ॥ प्रोल्लसत्सप्तजिह्वा च नाभिना
लमृणालिनी ॥ ६४ ॥ मूलाधारा निराधारा वह्निकुंडकृतालया ॥ वायु

कुंडसुखासीना निराधारा निराश्रया॥६५॥श्वासोच्छ्वासगतिर्जिह्वा
ग्राहिणी वह्निसंश्रया॥ वल्लीतंतुसमुत्थाना षड्रसास्वादुलोलुपा॥
६६॥तपस्विनी तपःसिद्धा तापसी च तपःप्रिया॥ तपोनिष्ठा तपोयुक्ता
तपसः सिद्धिदायिनी॥६७॥सप्तधातुमयीमूर्त्तिः सप्तधात्वंतरालया
॥देहपुष्टिर्मनःपुष्टिरन्नपुष्टिर्बलोद्धता॥६८॥ओषधीवैद्यमाता च
द्रव्यशक्तिप्रभाविनी॥वैद्यविद्या चिकित्सा च सुपथ्या रोगनाशिनी॥
६९॥मृगया मृगमांसा च मृगत्वंमृगलोचना॥वागुरा बंधरूपा च
वधरूपा वधोद्धता॥७०॥बंदी बंदिस्तुता कारा कारा बंधविमोचनि
॥श्रृंखला कलहा विद्या दृढबंधविमोचनी॥७१॥अंबिका बालिका
चांबा स्वस्था साधुजनार्चिता॥ कौलिकी कुलविद्या च सुकुला कुलपू

रामः
६

जिता॥७२॥कालचक्रभ्रमाभ्रांताविभ्रमाभ्रमनाशिनी॥ वास्यालीमे
घमालाचसुवृष्टिः सस्यवर्द्धिनी॥७३॥ अकाराचइकाराद्यन्तका
रोकाररूपिणी॥ ह्रींकारीबीजरूपाचक्लींकारोंबरवासिनी॥७४॥
सर्वाक्षरमयीशक्तिरक्षरावर्णमालिनी॥ सिंदूरारुणवर्णाचसिंदू
रतिलकप्रिया॥७५॥ वश्याचवश्यबीजाचलोकवश्यविधायिनी॥ नृ
वश्यान्नृपैः सेव्यानृपवश्यकरीक्रिया॥७६॥ महिषीनृपमान्याचनृ
पाज्ञानृपनंदिनी॥ नृपधर्ममयीधन्याधनधान्यविवर्द्धिनी॥७७॥
चातुर्वर्ण्यमयीमूर्त्तिश्चतुर्वर्णैश्चपूजिता॥ सर्वधर्ममयीसिद्धिश्चतु
राश्रमवासिनी॥७८॥ ब्राह्मणीक्षत्रियावैश्याशूद्राचावरवर्णजा॥
वेदमार्गरतायज्ञावेदविश्वविभाविनी॥७९॥ अस्त्रशस्त्रमयीविद्या

वरशास्त्रास्त्रधारिणी॥सुमेधासत्यमेधाचभद्रकालीपराजिता॥८०॥
गायत्रीसत्कृतिःसंध्यासावित्रीत्रिपदाश्रया॥त्रिसंध्यात्रिपदीधात्री
सुपथासामगायिनी॥८१॥पांचालीबालिकाबालाबालक्रीडासना
तनी॥गर्भाधारधराशून्यागर्भाश्रयनिवासिनी॥८२॥सुरारिघाति
नीकृत्यापूतनाचतिलोत्तमा॥लज्जारसवतीविद्याभवानीपापनाशि
नी॥८३॥पट्टांबरधरागीतिःसुगीतिर्ज्ञानिगोचरा॥सप्तस्वरमयीतंत्री
खड्जमध्यमधैवता॥८४॥मूर्छनाग्रामसंस्थानास्वस्थास्वस्थानवा
सिनी॥अट्टाट्टहासिनीप्रेताप्रेतासननिवासिनी॥८५॥गीतनृत्यप्रि
याकामातुष्टिदापुष्टिदाक्षमा॥निष्टासत्यप्रियाप्रीतालोकेशाचसुरोत्त
मा॥८६॥सविषाज्वालिनीज्वालाविषमोहार्तिनाशिनी॥शतमारीमहा

देवी वैष्णवी शातपत्रिका ॥८७॥ विषारी नर्मदमनी कुरुकुल्यामृतोद्भवा
॥ भूतभीतिहरा रक्षा भूतावेशनिवासिनी ॥८८॥ रक्षोघ्नी राक्षसी रात्री
दीर्घनिद्रा दिवागतिः ॥ चंद्रिका चंद्रकांतिश्च सूर्यकांतिर्निशाचरी ॥
८९॥ डाकिनी शाकिनी शिक्षा हाकिनी चक्रवाकिनी ॥ शीताशीतप्रिया
स्वांगा सकला वनदेवता ॥९०॥ गुरुरूपधरा गुर्वी मृत्युमारी विशार
दा ॥ महामारी विनिद्रा च तंद्रा मृत्युविनाशिनी ॥९१॥ चंद्रमंडलसंका
शा चंद्रमंडलवर्त्तिनी ॥ अणिमादिगणोपेता सुस्पृहा कामरूपिणी ॥
९२॥ अष्टसिद्धिप्रदा प्रौढा दुष्टदानवघातिनी ॥ अनादिनिधना पुष्टि
श्चतुर्बाहुश्चतुर्मुखी ॥९३॥ चतुरब्धिशया शांता चतुर्वर्गफलप्रदा
॥ काशपुष्पप्रतीकाशा शरत्कुमुदलोचना ॥९४॥ भूतभव्यभविष्या

च शैलजा शैलवासिनी ॥ वामाचाररता तुष्टिर्लोपामुद्राप्रबोधिनी ॥ ८५ ॥
वाममार्गरता वामा शिववामांगवासिनी ॥ भूतात्मा परमात्मा च भूतभा
वनभाविनी ॥ ८६ ॥ मंगला च सुशीला च परमार्थप्रबोधिका ॥ दक्षिणा
दक्षिणामूर्त्तिः सुदक्षिणा हविःप्रिया ॥ ८७ ॥ योगिनी योगयुक्ता च योगां
गा ध्यानशालिनी ॥ योगपट्टधरा मुक्ता मुक्तानां परमा गतिः ॥ ८८ ॥ ना
रसिंही सुजन्मा च त्रिवर्गफलदायिनी ॥ धर्मदा धनदा चैव कामदा
मोक्षदा द्युतिः ॥ ८९ ॥ साक्षिणी क्षणदा कांक्षा दक्षजा कूटरूपिणी ॥ क्र
तुः कात्यायनी स्वच्छा स्वच्छंदा च कविप्रिया ॥ १०० ॥ सत्यागमा बहिस्था
च काव्यशक्तिः कवित्वदा ॥ मेनापुत्री सती साध्वी मेनाकभगिनी तडित्
॥ १ ॥ सौदामिनी सुदामा च सुदामा धामशालिनी ॥ सौभाग्यदायिनी द्यौ

श्वसुभगा द्युतिवर्द्धिनी ॥२॥ ह्रीं श्रीश्चकीर्त्तिवस्रनात्तलत्तिकाकलि
नाशिनी॥ रक्तबीजवधा दृप्तास्तुतंतु वीजिसंततिः॥३॥ जगज्जीवाउ
गह्वीजाजगत्त्रयहिते षिणी॥ चामीरा करेच चंद्रेच साक्षाघा षोडशी
कला॥४॥ यत्तस्य दानुबंधाच यक्षिणी पन्नदाच्छिता॥ चित्रिणी चि
त्रमायाच विचित्रा भुवनेश्वरी॥५॥ चामुंडा मुंडहस्ताच चंडमुंडव
धोद्यता॥ अष्टम्येकादशी पूर्णानवमीच चतुर्दशी॥६॥ उमाकल
शहस्ताच पूर्णकुंभपराधरा॥ अभीरु भैरवी भीम भीमा त्रिपुरभै
रवी॥७॥ महाचंडाचरौद्राचमहा भैरवपूजिता॥ न्रमुंडा हस्तिनी चं
डाविकरालादशानना॥८॥ कराली विकरालाच घोरघर्घरनादि
नी॥ रक्तदंतोर्द्ध्वकेशीच बंधूककुसुमारुणा॥९॥ कादंबरीविपाशाच

७

काश्मीरी कुंकुमप्रिया॥ क्षितिर्बिंदुसुवर्णा च रतिर्बिंदुसुवर्णदा॥
१०॥ मातंगिनी वरारोहा मत्तमातंगगामिनी॥ हंसा हंसगतिर्हंसि
हंसोज्वलशिरोरुहा॥११॥ पूर्णचंद्रमुखी श्यामा स्मितास्या च सु
कुंडला॥ मखी च लेखिनी लेखा सुलेखा लेखकप्रिया॥१२॥ शंखि
नी शंखहस्ता च जलस्था जलदेवता॥ कुरुक्षेत्रावतिः काशी मथु
रा कांस्यवंतिका॥१३॥ अयोध्या द्वारिका माया तीर्था तीर्थकरी
प्रिया॥ त्रिपुष्करा प्रमेया च कोशस्था कोशवासिनी॥१४॥ कोशि
की च कुशावर्त्ता कौशांबी कोशवर्द्धिनी॥ कोशदा पद्मकोशाक्षी कु
सुंभकुसुमप्रिया॥१५॥ तोतला च तुला कोटिः कूटस्था कोटरा
श्रया॥ स्वयंभूश्च स्वरूपा च स्वरूपा रूपवर्द्धिनी॥१६॥ तेजस्वि

नीसुतिक्ष्णा च बलदा बलदायिनी ॥ महाकोशा महागर्त्ता बुद्धिः स
दसदात्मिका ॥१७॥ महाग्रहहरा सौम्या विशोका शोकनाशिनी ॥
सात्विकी सत्वसंस्था च राजसी च रजोवृता ॥१८॥ तामसी च तमो
युक्ता गुणत्रयविभाविनी ॥ अव्यक्ता व्यक्तरूपा च वेदविद्या च शां
भवी ॥१९॥ शंकरी ल्हादिनी कल्या मनः संकल्पसंततिः ॥ सर्व
लोकमयी शक्तिः सर्वश्रवणगोचरा ॥२०॥ सर्वज्ञानवती वांछा
सर्वतत्वावबोधिका ॥ जाग्रती च सुषुप्तिश्च स्वप्नावस्था तुरीयका
॥२१॥ त्वरा मंदगतिर्मंदा मदिरामोदमोदिनी ॥ पानभूमिः पानपात्रा
पानदानकरोद्यता ॥२२॥ आघूर्णितारुणनेत्रा च किंचिदव्यक्तभा
षिणी ॥ आशापुरवती दक्षा दक्षो दीक्षितपूजिता ॥२३॥ नागवल्ली

नागकन्या भोगिनी भोगवल्लभा ॥ सर्वशास्त्रमयी विद्या सुस्मृतिध
र्मवादिनी ॥२४॥ श्रुतिस्मृतिधरा ज्येष्ठा श्रेष्ठा पातालवासिनी ॥ मी
मांसा तर्कविद्या च सुभक्तिर्भक्तवत्सला ॥२५॥ सुजातिर्यतिना
जातिर्गंभीरा भोगवर्जिता ॥ नागपाशधरा मूर्त्तिरगाधा नागकुं
डला ॥२६॥ सुचक्रा चक्रमध्यस्था चक्रकोणविनासिनी ॥ स
र्वमंत्रमयी विद्या सर्वमंत्राक्षरां वरा ॥२७॥ मधुश्रवा श्रवंती च
भ्रामरी भ्रमरालिका ॥ मातृमंडलमध्यस्था मातृमंडलवासि
नी ॥२८॥ कुमारजननी क्रूरा सुमुखा ज्वरनाशिनी ॥ निदानं
पंचभूतानां भवसागरतारिणी ॥२९॥ अक्रूरा च महावर्त्ता वि
ग्रहा ग्रहवर्जिता ॥ रोहिणी भूमिगर्भा च कालभूः कालवर्तिनी ॥३०॥

कलंकरहिता नारी चक्षुःपक्ष्माभिधायिनी ॥ अतीता विघ्नमा
नाच भवानी प्रीतिमंजरी ॥ २१ ॥ सर्वसौख्यवती युक्तिराहार
परिणामिनी ॥ जीर्णा च जीर्णवस्त्रा च नूतनानववल्लभा ॥
२२ ॥ अजरा च रजःप्रीता रतिरागविवर्द्धिनी ॥ पंचवातगति
र्भिन्ना पंचश्लेष्माशयाधरा ॥ २३ ॥ पंचपित्तवती शक्तिः पंच
स्थानविभाविनी ॥ उदक्या च वृषस्यंतिर्वृषप्रस्रवणी हया ॥ २४
॥ रजःशुक्रधरा शक्तिर्जरायुर्गर्भधारिणी ॥ त्रिकालज्ञा त्रिलिं
गया च त्रिमूर्त्तिस्त्रिपुरसुंदरी ॥ २५ ॥ अरागा शिवतत्वा च काम
तत्वा च रागिणी ॥ प्राच्यावाची प्रतिची च उदीची च विदिग्दिशा ॥ २६

अहंकृतिरहंकारा बलिमाया बलिप्रिया॥ श्रुक्स्रुवा साम
धेनी च सश्रद्धा श्राद्धदेवता॥३७॥ माता मातामही मूर्त्तिः पि
तुर्मातापितामही॥ स्नुषा दौहित्रिणी पुत्री पौत्री नप्त्री शिशु
प्रिया॥३८॥ स्तनदा स्तनधारा च विश्वयोनिः स्तनंधयी॥ शि
शूत्संगधरा दोला दोलाक्रीडाभिनंदिनी॥३९॥ उर्वशी कद
ली केका शिखिस्था शिखिवर्त्तिनी॥ खट्वांगधारिणी खट्वा
बाणपुंखानुवर्त्तिनी॥४०॥ अलक्ष्यापि कालक्ष्या लक्ष्यार्च
शुभलक्षणा॥ वर्त्तिनी सुपथाचारा परिखा च खनिर्वृतिः॥४१
॥ प्राकारवलया वेला मर्य्यादा च महोदधेः॥ पोषणी शोषणी श

सुसंस्कारा च संस्कृतिः ॥४०॥ प्राकृता देशभाषा च

किरीर्घकेशी सुलोमसा ॥४१॥ ललिता मांसला तन्वि वेदवेदांगधारिणी
॥ नानास्त्र कृपा नमसा च नरमुंडविभूषणा ॥४२॥ अक्षक्रीडारतिः सारि
सारिकासुरभाषिणी ॥ शांवरी गारुडी विद्याकारुणी करुणाचिंता ॥४४॥
वाराही तुंडहस्ता च दंष्ट्रा कृतवसुंधरा ॥ मीनमूर्तिर्धरा मूर्तिर्वदान्या
प्रतिमाश्रया ॥४५॥ अमूर्त्ता निधि मूर्त्तिश्च शालग्रामा शिला शुचिः ॥
स्मृतिः संस्काररूपा चैं गाथा गीतिः प्रहेलिका ॥ इडा च पिंगला पिंगा सु
षुम्ना सूर्यवाहिनी ॥४६॥ शशि भ्रवा च तालुस्था काकिनी मृतजीविनी ॥
अनुरूपा वृहद्रूपा लघुरूपा गुरुस्थिता ॥४८॥ स्थावरा जंगमा चैव कृत
कर्मफलप्रदा ॥ विषयाक्रांतलोका च निर्विकारा जितेंद्रिया ॥४९॥ चित्स्व

रूपा चिदानंदा परब्रह्मावबोधिनी ।। निर्विकारा च निर्वैरा विरतिः सत्व
वर्द्धिनी ।। ५० ।। पुरुषज्ञा च भिन्ना च ख्यातिः कैवल्यदायिनी ।। विविक्त
सेविनी प्राज्ञा ज्वलना चैव कुण्डला ।। ५१ ।। निरीहा च समस्तैका सर्वलो
कैकसेविता ।। शिवा शिवप्रिया शैव्या सेवाफलविवर्द्धिनी ।। ५२ ।। कलौ
कल्किप्रिया शीला दुष्टम्लेच्छविनाशिनी ।। प्रत्यंचा च धनुर्यष्टिः खड्ग
धारा धुरारथा ।। ५३ ।। अश्वप्लुतिश्च वल्गा च भृगिः स्यान्मत्तवारणे ।
वीरभूर्वीरमाता च जयदा जयवर्द्धिनी ।। ५४ ।। सौभाग्यशुभगाकारा स
र्वसौभाग्यवर्द्धिनी ।। ५५ ।। क्षेमंकरी सिद्धिरूपा सत्कीर्तिः पथिदेवता ।।
सर्वतीर्थमयी मूर्तिः सर्वदेवमयी प्रदा ।। सर्वसिद्धिप्रदा शक्तिः सर्वमं

धीरसूर्वीरनंदिनी ।। ५६ ।। जयश्रीर्जयदीक्षा च

गलमंगला ॥ पुण्यं सहस्रनामेदं मंगलायाः रुद्रभाषितं ॥ ५७ ॥ यः पठेत्प्रा
तरुत्थाय शुचीर्भूत्वा समाहितः ॥ स श्रियं प्राप्नुयान्नित्यं नरो निश्च
लमानसः ॥ ५८ ॥ एककालं द्विकालं वा त्रिकालं श्रद्धयान्वितः ॥ सर्वदुः
खविनिर्मुक्तो धनधान्यसमन्वितः ॥ ५९ ॥ तेजस्वी बलवान्शूरः शो
करोगविवर्जितः ॥ यशस्वी कीर्तिमान् धन्यः सुभगो लोकपूजितः ॥
६० ॥ रूपवान्गुणसंपन्नः प्रभावीर्यसमन्वितः ॥ श्रेयांसि लभते नित्यं
निश्चलां च शुभां श्रियं ॥ ६१ ॥ सर्वपापविनिर्मुक्तो लोभक्रोधविवर्जितः
॥ नित्यं बंधुसुतैर्दारैः पुत्रपौत्रैर्महोत्सवैः ॥ ६२ ॥ नंदितः सेवितो भृत्यै
र्बहुभिः शुद्धमानसैः ॥ विद्यानां पारगो विप्रः क्षत्रियो विजयी रणे ॥
६३ ॥ वैश्यस्तु धनलाभाढ्यः शूद्रश्च सुखमश्नुते ॥ पुत्रार्थी लभते पुत्रं

धनार्थी लभते धनं ॥६४॥ तुष्टा कामं तु कामार्थी धर्मार्थी धर्ममक्षयम् ॥
कन्यार्थी लभते कन्यां रूपशीलगुणान्वितः ॥६५॥ क्षेमं च वक्रुस स्यात्
वां च वकुतुग वदा ॥ नाशुभं वापदस्तस्य न भयं नृपशत्रुभिः ॥६६॥ जा
यते नाशुभा बुद्धिर्लभते कुलधूर्यतां ॥ न बाधंते ग्रहस्तस्य न रक्षांसि
न पन्नगाः ॥६७॥ न पिशाचा न डाकिन्यो भूतवंतारजंभकाः ॥ बालग्र
हाभिभूतानां बालानां शांतिकारकं ॥६८॥ द्वंद्वानां प्रीतिभेदे च मैत्रीकर
णमुत्तमं ॥६९॥ लोहपाशैर्दृढैर्बद्धो वंदीवेश्मनि दुर्गमे ॥६९॥ तिष्ठन्नु
एवं न्पठन्मर्त्यो मुच्यते नात्र संशयः ॥ न दाराणां न पुत्राणां वधूनां न च
मित्रजं ॥७०॥ पश्यंति न हि ते शोकं वियोगं चिरजीविनः ॥ अंधस्तु लभते
दृष्टिं चक्षुरोगैर्न बाध्यते ॥७१॥ बधिरः श्रुतिमाप्नोति मुको वाचाशुभां नरः ॥

पतद्गर्भास्तु या नारी स्थिरगर्भा प्रजायते ॥७२॥ आविली बद्धगर्भा च सुख
मेव प्रसूयते ॥ कुष्ठिनः शीर्णदेहा ये गतकेशनखत्वचः ॥७३॥ पठनात्
श्रवणाद्वापि दिव्यकाया भवंति ते ॥ ये पठंति शतावर्त्तं शुचिष्मंतो जितेंद्रि
यः ॥७४॥ अपुत्रा प्राप्नुयः पुत्रान् श्रएव तोपि न संशयः ॥ महाव्याधिप
रग्रस्तास्त्रस्ता ये विविधैर्ज्वरैः ॥७५॥ भूताभिचारसंघातैश्चातुर्थिकतृ
तीयकैः ॥ अन्यैश्च दारुणै रोगैः पीड्यमानाश्च मानवाः ॥७६॥ गतबाधा
14 श्चजायंते ते मुक्तास्ते न संशयः ॥ इति ग्रंथ परो बालो दग्धवादी कवि
श्वरः ॥७७॥ पठनाच्छ्रवणाद्वास्य भवित पति न संशयः ॥ अष्टम्यां च चतु
र्दश्यां नवम्यां चैकचेतसः ॥७८॥ ये पठंति सदा भक्त्या न ते वै दुःखभागि
नः ॥ नवरात्रं जिताहारो दृढबुद्धि जितेंद्रियः ॥७९॥ चंडिकायतने विद्वान्

शुचिष्मान्मूर्त्तिसन्निधौ॥ एकाकी च शतावर्त्तं पठन्धीरस्त्वनिर्भयः॥८०॥
साक्षाद्भगवती तस्मै प्रयच्छेदीप्सितं फलं॥ सिद्धपीठे गिरौ रम्ये सिद्धक्षे
त्रे सुरालये॥८१॥ पठनात्साधकस्याशु सिद्धिर्भवति वांछिता॥ दशाव
र्त्तं पठेन्नित्यं भूमिशायी नरः शुचिः॥८२॥ स्वप्ने मूर्त्तिमयीं देवीं वरदां
सोपि पश्यति॥ आवर्त्तनसहस्रं ये जपंति पुरुषोत्तमाः॥८३॥ ते सि
द्धाः सिद्धिदा लोके शापानुग्रहणे क्षमाः॥ कवित्वं संस्कृतं तेषां शास्त्रा
णां व्याकृतौ स्फुटः॥८४॥ शक्तिः प्रोन्मीलते तेषां मनधीतेपि भारती॥
नरवरा नागशिरोरत्नछृष्टांगुली लतरो चिषः॥८५॥ प्रपंचं तस्य सर्वस्वं
सेवंते तान्महीश्वराः॥ रोचनालिखितं भूर्जे कुंकुमेन शुभे दिने॥८६
॥ धारयाघत्रितं देहे पूजयित्वा कुमारिका॥ विप्रांश्च वरनारीश्च धु

यैः कुसुमचंदनैः ॥८७॥ क्षीरखांडाज्यमोदैश्च भोजयित्वा तु भूषिताः ॥ वि-
धाय मातृकान्यासं मंत्रन्यासपुरःसरं ॥८८॥ भूतशुद्धिसमोपेतं शंखला-
न्यासमाचरेत् ॥ यथा वंदारिः संबंध्य साधकः प्रीतिसंयुतः ॥८९॥ मूलमं-
त्रं जपेद्धीमान् परया संयुतो ह्रिया ॥ प्रणवं पूर्वमुद्धृत्य परमाबीजमनुस्मरन् ॥
९०॥ मायां कामो समुद्धार्य पुनर्मायां विभावसो ॥ मंत्रराजमिमं धीमान् सं-
पुटं येसो येस्पुरा ॥९१॥ पुरेणं च त्रिमधुभिर्ईशांशो हवने कृते ॥ प्रयोगान् सा-
15 धयेद्धीमान् बहुधा साधकोत्तमः ॥९२॥ मधुना केवलेनैव वश्याः स्युः स-
र्वसंपदा ॥ घृतेन विश्ये ह्रि प्रान् शीतया क्षत्रियान् थ ॥९३॥ वैश्यान्य लाथ
होमेन महद्धान् त्र प्रहोमतः ॥ स्मार वारे जपेद्यस्तु नरो भवस्यं समाश्रितः ॥९४
॥ निधिनिर्भयधीर्वीरो हस्ते कृत्वासि मुत्तमं ॥ सपुटैक विधानेन राजाभ-

र्त्तिवश्यगाः॥९५॥ अमृतद्वितीयेनैव विजयी जायते क्षणात्॥ ॥र वैद्दुर्वैपरिरक्षि
त्वायण कांतेसनिर्भयः॥९६॥ जपेत्संचसहस्रंतु जायते विलसंपदाः॥ रोगा
सर्वे विलीयंते दीर्घायुश्चापि विंदति॥९७॥ अनेनयोगवर्य्येण कवित्वमतुलं
भवेत्॥ कुंजेष्टम्यां स्थिते यस्तु पठेत् पद्मासनः सुधीः॥९८॥ वटस्य मूले जप
ति लक्षं लैकाग्रं च मानसं॥ सहस्त्रत्रितयं सोथ प्राप्नोति महतिं श्रियं॥९९॥ यो
नरामृत दिवसे स्यर्कमूलं समाश्रितः॥ जपेत् नदन्न्यया तु आसाधकोनिर्भया
शयः॥१००॥ तस्य शत्रुगणाः सर्वे गच्छंति यममंदिरम्॥ एकरात्रप्रयोगेन स
हाद्रिपुनाशनं॥१॥ ग्रहेणशशिनः स्थित्वा धर्यैकाते महामनः॥ पालाशमू
के प्र जपेत्तदमृतं श्रद्धया मृता॥२॥ तस्य शत्रुगणो न्यो नं जायते कलहो भ
शं॥ योनदीतिरमाश्रित्य जपेदेकाग्रमानसः॥३॥ एकादश सहस्त्रं तु निर्भयः

पुलकांचितः॥ भवेपुत्रस्य संसिद्धास्तघोविघ्नाश्चतुर्दिशः॥४॥ स्मशानेतु
समागत्यदिक्पालबलिमाहरेत्॥ भूतेक्षेत्रे कुंजेसास्ता निर्भयः साधको
त्तमः॥५॥ गृहीत्वा बलिसंभारं तत्रस्थित्वाशवोपरि॥ जपेदनन्ययाबुद्ध्याभं
पत्रासविवर्जितः॥६॥ सपश्येद्देवतांतत्र वरदानकृतोद्यमां॥ यद्दृष्ट्वास्थमे
तत्रमौनीभूत्वासमाहितः॥७॥ द्वितीयवाक्यापितथायत्नवान्नयतोभवे
त्॥ अथसुश्लक्षणयावाचा प्रार्थयेन्मानसंफलं॥८॥ वरसंछन्नवपुषा
दागसनिजवेश्मनि॥ कन्यकाभोजयेद्धीमानूस्तथारम्यांवरांगनां॥९॥
16 एवंगुरुप्रयत्नेनतोषयेद्देवताधिपा॥ अनेनवरयोगेनधनदेनसमंभवेत्
॥१०॥ ततोन्यंपरमंवक्ष्ये विधिलोकैकहेतवे॥ आकर्षणस्यमतिमान्नवश
येदपिचस्त्रियः॥११॥ स्थित्वाकिंशुकमूलेतु व्याघ्रचर्मणिदक्षिणः॥ रक्तांबर

परीधानोरक्तमाल्यानुलेपनः ॥१२॥ पूजयित्वागणेशानींपुष्पसिंदूरचं
र्चितां ॥ यन्नाम्नाप्युत्तमेकंचपूजयेत्तांविचक्षणः ॥१३॥ क्षणादाकर्षयेन्नारी
मुर्वशीमपिमानवः ॥ अनेनैवविधानेनद्व्याघ्राकोष्ठसत्तमा ॥१४॥ जा
यतेनात्रसंदेहःशंकरस्यैवमाज्ञया ॥ वंध्याप्रयोगंकुर्वाणःसाधकःप्रय
ताशयः ॥१५॥ कुंजेष्टम्यांवटस्याहंमूलेस्थित्वाविचक्षणः ॥ रात्रौनिर्भय
चित्तस्तुप्रजपेत्सुतत्रयं ॥१६॥ ध्यात्वादेवींवालरूपांवाचांचमौनसंयु
तां ॥ सयथोत्तरतरशतंयस्यैद्व्यावरोधतां ॥१७॥ साप्राप्नोतिपुत्रफल
चिरायुःसहितंमुदा ॥ वाचस्तंभनकामस्तुहरिद्रामूलमाश्रितः ॥१८॥ ए
करात्रेजपेद्यस्यनाम्नाप्रयतमानसः ॥ तस्याजिह्वाक्षणात्स्तंभमाप्नोतिपि
बृहस्पतेः ॥१९॥ येनासंस्तंभंकर्णेकामाः सर्षपान्वतवर्णान्विता ॥ जुहुयादेक

17

दिवशात्सैन्यंस्तंभमवाप्नुयात्॥२०॥सेनानाशंप्रकुर्वाणोविघ्नंविपुल
मिश्रितम्॥कृत्वाग्नौजुहुयाद्धीमान्सैन्यनाशायसाधकः॥२१॥रोगनाशं
प्रीतिमनाःहोमंक्षीराज्यसंयुतं॥जुहुयाद्धस्तेनाम्नांतुतस्यनस्यंस्तु
पद्रवाः॥२२॥एवंविधानेनसुधीःसाधयित्वाविचक्षणः॥स्तोत्रंनिर्भ
यश्चुद्धाच्चसाधयेत्साधकोत्तमः॥२३॥आदौविधायसुध्यानंविन्यो
गंचमनुस्मरेत्॥पश्चात्पाठंप्रकुर्वाणोभुक्तिमुक्तिप्रविंदति॥२४॥ॐअ
स्यश्रीस्तवराजस्तोत्रस्यसदाशिवऋषिः॥देवताजगतीधात्रीत्रिकुं
डापरमोत्तमा॥२५॥शक्तिश्चंडीकीलकंकामराजाभिधंवदेत्॥छंदोनु
ष्टुप्समाख्यातंमनसोवांछितंफलं॥२६॥अथध्यानं॥वदाम्यस्यदेव्या
स्तस्तोत्रंपरममुत्तमं॥कृतेनानेनजायंतेनृणांसर्वेमनोरथाः॥२७॥

नाभेरधस्तान्नीलो मां मुपरी स्यामलाकृति ॥ अग्रेचरस्त्रको विद्राभ्यां चतु
र्भुजसमन्वितं ॥२८॥ गेवेयांमदसंयुक्तो लसत्कांचीकलापिनी ॥ एवं ध्या
त्वा पठेत्सम्यक्स्तवराजं फलाप्तये ॥२९॥ ततो न्यासप्र कुर्वन्ती साधकः प्रे
मसंयुतः ॥ मे तु ङाग्रे दयापातु चंडिमे पातु सर्वतः ॥३०॥ पांचाली दक्षि
णे पार्श्वे महाविद्या च वामके ॥ ऊर्ध्वं पातु जगन्माता यातु त्वा ईशा चरी मम
॥३१॥ कौमारस्याद्दक्षिणे देशे मूलामा नैऋत्ये मम ॥ प्रोच्यां रक्षतु चामुं
डा वन्हिकोणे च गारुडी ॥३२॥ महालक्ष्मीर्जलाधीशो वायो पातु शिवप्रि
या ॥ कुबेरे कुलविद्या च पालीशो वारुणी तथा ॥३३॥ ऊर्ध्वं तु उकरा पातु अ
धस्तात्त्रिपुरभैरवी ॥ एवं न्यासं समाधाय पठेद्विघ्नविवर्जितः ॥३४॥ ब
ध्नंति जे महारक्षां बलानां च विशेषतः ॥ भवंति न पापसुज्यास्ते कीर्त्तिमायोय

रा.म:
२०

शस्विनः॥३५॥शत्रुतोनभयंतेषांदुर्जनेभ्योनराजतः॥नचचौरोगोनवैदुः
खंनदारिद्र्यंनदुर्गतिः॥३६॥महार्णवेमहानघापोतस्थेपुनभीःक्वचित्
॥रणेघृतेविवादेचविजयंप्राप्नुवंतिते॥३७॥नृपाश्चवश्यतांयांतिनृपम
न्याश्चतेनराः॥सर्वत्रपूजितालोकेबहुमानपुरःसराः॥३८॥रतिरागा
विविधूश्चविव्हलाकामपीडिता॥यौवनाक्रांतदेहास्तानृश्रयंतेवामलो
चनाः॥३९॥लिखितंमूर्द्धिकंठेवाधारयेघोररणेषुचैः॥सहधायुध्यमा
नंतुप्रतियोधानपश्यति॥४०॥केतौविंदुंदुभौयेषांतिर्य्यहालिखितंरणे
महासैन्येपरित्रस्ताकांदिशीकाहतोजसः॥४१॥विचेतनाविमूढाश्च
शस्त्रहलसविवर्जिताः॥निर्जिस्यशत्रुसंघास्तेलभंतेविजयंध्रुवं॥४२॥
नाभिचारोनशापाश्चवाणवीरादिकिंजनं॥डाकिनीपूतनाहसामहाम
रीचशाकिनी॥ [illegible] भूतप्रेतपिशाचाश्च [illegible] व्यंतरादयः॥नविशंति

गृहे देहे लिखितं यंत्र तिष्ठति ॥ ४४ ॥ न भा स्तान लतो यो घा मयंतस्य न
जायते ॥ दुर्वृत्तानां च पापानां वल हानि करं परं ॥ ४५ ॥ मंदुराकरिशा
लासु गवां गोष्ठे समाहितः ॥ पठेत्तद्दोषशांत्यर्थे क्रूर पाश विनाशनं ॥
४६ ॥ यम दूतान्न पश्यंति न ते निरय यातनां ॥ प्राप्नुवंस क्षयं शांत शि
व लोकं सनातनं ॥ ४७ ॥ सर्वबाधासु घोरासु सर्व दुःख निवारणे ॥ स
र्व मंगलकं स्वर्ग्यं पठितव्यं सदा बुधैः ॥ ४८ ॥ पुण्यं सहस्र नामेदं मंवा
या रुद्र भाषितं ॥ चतुर्वर्गप्रदं सद्यं नंदिकेन प्रकाशितं ॥ ४९ ॥ ना
तः परतरो मंत्रो नातः परतरः स्तवः ॥ नातः परतरा विद्या तीर्थं ना
तः परः परं ॥ ५० ॥ ते धन्या कृत पुण्यास्ते त एव भुवि पूजिताः ॥ एक
भावं सदा निसं ये र्चयंति महेश्वरीं ॥ ५१ ॥ देवतानां देवताया ब्रह्म

रामः
१८

देयं च पूजिताः ॥ भूयात्सा वरदा लोके साधूनां विश्वमंगला ॥ १५४ ॥
इति श्रीरुद्रयामले नंदिकेश्वरसंवादे भवानीसहस्रनामस्तोत्रं सं
पूर्णं ॥ ॥ श्रीभवानीशंकरार्पणमस्तु ॥ शुभं भवतु ॥ ॥ ६ ॥
संवत् १८७० शोभननामसंवत्सरे पौषकृष्ण अमावास्यां श्रीपट्टण
नगरे लिखितं ॥ ॥ ६ ॥ ६ ॥ ६ ॥

राम: १९

20